# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल–२०१६

**कक्षा** – आचार्य-२ ( **Sem_4** ) **प्रश्नपत्र-२** **गुणाः** – ७०

**विषयः** – **पुराणेतिहासः** CC 5.4.10 **समयः** – ११:०० तः ०२:००

**दिनाङ्कः** – 18/04/2016 **सन्दर्भग्रन्थः** – **महाभारते वनपर्व – तीर्थयात्रापर्व ८०-११९ अध्यायाः**

---

## युनिट-१

**प्रश्न-१ कस्याप्येकस्योत्तरं सविस्तरं लिख्यताम् ।** १२

१. तीर्थयात्राफलम् – ग्रन्थोक्तदिशा निरूप्यताम् ।

२. युधिष्ठिराय घौम्य-मुनेः उपदशवचनम् ।

३. वेदव्यासस्य परिचयो लेख्यः ।

**प्रश्न-२ यथेच्छं श्लोकमेकं सप्रसङ्गं व्याख्ययताम् ।** ०४

१. सोमतीर्थे नरः स्नात्वा तीर्थसेवी कुरुद्वह । सोमलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥

२. गङ्गा यत्र नदी पुण्या यस्यास्तीरे भगीरथः । अयजत्तात बहुभिः क्रतुमिर्भूरिदक्षिणैः ॥

**प्रश्न-३ चतुर्णां प्रश्नानां लघूत्तराणि लिखत ।** ०४

१. महाभारतं कतमो वेदः?

२. कः कुम्भजः ऋषिः?

३. गोकर्णमहादेवः कस्मिन् तीर्थे वसति?

४. कः मधुसूदनः अस्ति?

५. त्रिरात्रं लोमशनेन सह कः काम्यकेऽवसत्?

६. अर्जुनः कुत्र अवर्तत?

७. महाभारते कति मुख्यपर्वाणि सन्ति?

## युनिट-२

**प्रश्न-४ महाभारतमतानुसारम् अर्जुनस्य चरित्रं चित्रयन्तु ।** ०४

**अथवा**

**अगस्त्य-ऋषेः चरित्रं महाभारतानुसारं वर्णयत ।**

**प्रश्न-५ कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या ।** ०८

१. शरीरनियमं ह्याहुर्ब्राह्मणा मानुषं व्रतम् । मनोविशुद्धां बुद्धिं च दैवमाहुर्व्रतं द्विजाः ॥

२. आदिदैत्यो महावीर्यो हिरण्यकशिपुस्त्वया । नारसिंह वपुः कृत्वा सूदितः पुरुषोत्तम ॥

३. सहस्रसंमितः पुत्र एको मेऽस्तु तपोधन । एको हि बहुभिः श्रेयान्विद्वान्साधुरसाधुभिः ॥

**प्रश्न-६ त्रायाणाम् एकेन वाक्येन उत्तरं दत्त ।** **०३**

१. कस्मिन् मासे पाण्डवाः वनवासार्थं प्रस्थिताः?

२. देवर्षिः कः?

३. कः शरीरं समुत्सृज्य अस्थीनि प्रदास्यति?

४. कालेयदैत्यः कुत्र निवसति?

५. महाभारते आरण्यकपर्व कतमं पर्व अस्ति?

## युनिट-३

**प्रश्न-७ श्लोकद्वयस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

१. एष लोकहितार्थं वै पिबामि वरुणालयम् । भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ॥

२. शङ्करं भवमीशानं शूलपाणिं पिनाकिनम् । त्र्यम्बकं शिवमुग्रेशं बहुरूपमुमापतिम् ॥

**प्रश्न-८ यन्न भारते तन्न कुत्रापि – समीक्षताम् ।** **०६**

**अथवा**

**सगरोपाख्यानम् – ग्रन्थोक्तदिशा विरूप्यताम् ।**

**प्रश्न-९ केचन पञ्चप्रश्नाः समाधेयाः ।** **०५**

१. वेदव्यासस्य मातुः नाम किम्?

२. कस्य प्रसादः व्यर्थः न भवति?

३. इतिहास शब्दस्य कोऽर्थः?

४. अंशुमतः पुत्रः कः?

५. ऋषभकूटे कः तापसः निवसति स्म?

६. पाण्डवाः कस्मात् दुःखिता आसन्?

७. वेदव्यासस्यापरं नाम किमवर्तत?

## युनिट-४

**प्रश्न-१० श्लोकद्वयं सप्रसङ्गं व्याख्ययताम् ।** **१२**

१. एषा देवनदी पुण्या कौशिकी भरतर्षभ् । विश्वामित्राश्रमो रम्य एष चात्र प्रकाशते ॥

२. कदा नु रामो भगवांस्तापसान्दर्शयिष्यति । तेनैवाहं प्रसङ्गेन द्रष्टुमिच्छामि भार्गवम् ॥

३. एकतः श्यामकर्णानां पाण्डुराणां तरस्विनाम् । सहस्रं वाजिनं शक्लमिति विद्धि द्विजोत्तम ॥

**प्रश्न-११ निम्नाङ्कितयोरन्यतरस्य श्लोकस्य व्याख्या विधेया ।** **०४**

१. न तानि सेवेत मुनिर्यतात्मा सतां लोकान्प्रार्थयानः कथञ्चित् ।
कृत्वा विघ्नं तापसानां रमन्ते पापाचारास्तपसस्तान्यपाप ॥

२. त्रिः सप्तकृत्वः पृथिवीं कृत्वानिःक्षत्रियां प्रभुः ।
समन्तपञ्चके पञ्च चकार रुधिरह्रदान् ॥

**प्रश्न-१२ ऋष्यशृङ्गस्य चरित्रं चित्रयन्तु ।** **०४**

**अथवा**

**परशुरामचरित्रं चित्रयन्तु ।**